1. **प्रश्ननिर्माणं कुर्वन्तु ।** [5]

I. वयम् समराङ्गणं गच्छामः ।

**Ans. :** के समराङ्गणं गच्छामः ?

II. शूराः वीराः वयम् ।

**Ans. :** शूराः वीरा के ?

III. वयम् जनसेवकाः स्मः ।

**Ans. :** वयम् के स्मः ?

IV. धनस्य कामना न भवेत् ।

**Ans. :** कस्य कामना न भवेत् ?

V. दृढ़मानसाः वयम् स्मः ।

**Ans. :** कीदृशाः वयम् स्मः ?

2. **सूचनाम् अनुसर्य लिखतु-** [12]

I. उदाहरणानुसारम् अधोलिखितानां पदानां वचनपरिवर्तनं कुर्वन्तु ।

यथा - शूराः वयम् = 'शूरः' 'अहम्' वीराः वयम् – "वीरः" "अहम्"

(क) ________ = बलशालिनः ________ जयगामिनः ।

(ख) दृढमानसाः = ________ प्रियसाहसाः = ________ ।

(ग) ________ = अतिभावुकाः शुभचिन्तकाः = ________ ।

(घ) धनकामना = ________ वञ्चना = ________ ।

**Ans. :** (क) बलशाली, जयगामी

(ख) दृढमानसः, प्रियसाहसः

(ग) अतिभावुकः, शुभचिन्तकः

(घ) धनकामनाः, वञ्चनाः

II. उदाहरणानुसारम् अधोलिखितानां पदानां वचन- परिवर्तनं कुर्वन्तु ।

| **एकवचनम्** | **बहुवचनम्** |
|---|---|
| यथा - शूरः - | शूराः |
| (क) धीरः - | ________ |
| (ख) ________ - | वीराः |
| (ग) जनसेवकः - | ________ |
| (घ) ________ - | धनकामनाः |

**Ans. :** (क) धीरः - धीराः

(ख) वीरः – वीराः

(ग) जनसेवकः – जनसेवकाः

(घ) धनकामना – धनकामनाः

III. उदाहरणं दृष्ट्वा अधोलिखितानि पदानि परस्परं संयोज्य वाक्यानि रचयन्तु ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| (क) | (ख) |
|---|---|
| (क) छात्रः | पठामि |
| (ख) छात्रौ | पठतः |
| (ग) छात्राः | पठति |
| (घ) अहम् | पठन्ति |

**Ans. :** (क) छात्रः पठति ।

(ख) छात्रौ पठतः।

(ग) छात्राः पठन्ति ।

(घ) अहं पठामि ।

IV. उदाहरणं दृष्ट्वा अधोलिखितानि पदानि परस्परं संयोज्य वाक्यानि रचयन्तु ।

| (क) | (ख) |
|---|---|
| (क) आवाम् | पठथः |
| (ख) वयम् | पठसि |
| (ग) त्वम् | पठावः |
| (घ) युवाम् | पठामः |

**Ans. :** (क) आवां पठावः ।

(ख) वयं पठामः ।

(ग) त्वं पठसि ।

(घ) युवां पठथः ।

V. उदाहरणमनुसृत्य उचितेन पदेन रिक्तस्थानं पूरयन्तु ।

यथा – नायिका नृत्यति । (नृत्)

(क) बालकः __________ । (लिख्)

(ख) छात्रौ __________ । (क्रीड्)

(ग) अहम् __________ । (गच्छ्)

(घ) कविः __________ । (पश्य्)

**Ans. :** (क) लिखति

(ख) क्रीडतः

(ग) गच्छामि

(घ) पश्यति

VI. उदाहरणमनुसृत्य उचितेन पदेन रिक्तस्थानं पूरयन्तु ।

यथा - नायिका नृत्यति । (नृत्)

(क) महिलाः __________ । (वद्)

(ख) देवाः __________ । (आगच्छ्)

(ग) फलानि __________ । (पत्)

(घ) गृहिण्यः __________ । (उपविश्)

**Ans. :** (क) वदन्ति

(ख) आगच्छन्ति

(ग) पतन्ति

(घ) उपविशन्ति

Get More Learning Materials Here : CLICK HERE www.studentbro.in

*** बहुविकल्पी प्रश्नाः** [10]

3. 'शूराः वयं धीराः वयम्' इति पाठस्य क्रमः कः?

(A) पञ्चमः (B) तृतीयः (C) चतुर्थः (D) षष्ठः

**Ans.:** (A) पञ्चमः

4. "शूराः वयं धीराः वयम्" अत्र 'वयम्' इति शब्दः केषां कृते प्रयुक्तः?

(A) बालकानां कृते (B) नृपाणां कृते (C) भारतीयानां कृते (D) धनिकानां कृते

**Ans. :** (C) भारतीयानां कृते

5. एतत् गीतं कीदृशम् अस्ति ?

(A) असुन्दरम् (B) सुन्दरम् (C) नीरसम् (D) उद्वेगकरम्

**Ans. :** (B) सुन्दरम्

6. के दृढसंकल्पयुक्ताः सन्ति ?

(A) एकः भारतीयः (B) सर्वे नृपाः (C) सर्वे वैदेशिकाः (D) सर्वे भारतीयाः

**Ans. :** (D) सर्वे भारतीयाः

7. वयं भारतीयाः कीदृशा चिन्तकाः?

(A) शुभचिन्तकाः (B) अशुभचिन्तकाः (C) चिन्तारहिताः (D) भयचिन्तकाः

**Ans.:** (A) शुभचिन्तकाः

8. अस्माकं हृदये का वञ्चना नास्ति ?

(A) ऊर्जस्वला (B) वर्चस्वला (C) सुखवासना (D) विजयकामना

**Ans. :** (C) सुखवासना

9. वयं कथं कार्यं कुर्मः?

(A) भयेन (B) दृढतया (C) कपटेन (D) धनकामनया

**Ans. :** (B) दृढतया

10. 'एतद्' शब्दस्य पुंलिङ्गे प्रथमाविभक्तेः द्विवचनस्य रूपं किम् ?

(A) एषः (B) एते (C) एताः (D) एतौ

**Ans. :** (D) एतौ

11. अस्मद् शब्दस्य प्रथमाविभक्तेः बहुवचनस्य रूपं किम् ?

(A) वयम् (B) अहम् (C) आवाम् (D) मम

**Ans.:** (A) वयम्

12. 'तद्' शब्दस्य स्त्रीलिङ्गे प्रथमाविभक्तेः एकवचनस्य रूपं किम् ?

(A) एषा (B) तत् (C) सा (D) सः

**Ans. :** (C) सा

13. **पाठस्य आधारैण प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु ।** [5]

I. शूराः के?

Student Bro
Get More Learning Materials Here : CLICK HERE www.studentbro.in

Ans. : भारतीयाः

II. वयं कीदृशमानसाः स्मः ?

Ans. : दृढ

III. वयं कीदृशचिन्तकाः स्मः ?

Ans. : शुभ

IV. वयं कुत्र अतिनिश्चलाः स्मः ?

Ans. : विजये

V. वयं विजयार्थिनः कुत्र यामः ?

Ans. : समराङ्गणम्

*** उचितैः अर्थैः सह मेलनं कुरुत-** **[4]**

14.

| 'क' | 'ख' |
|---|---|
| नियतम् | यच्छ |
| शूराः | गच्छामः |
| देहि | निश्चितम् |
| यामः | पराक्रमी |

Ans. :

| 'क' | 'ख' |
|---|---|
| नियतम् | निश्चितम् |
| शूराः | पराक्रमी |
| देहि | यच्छ |
| यामः | गच्छामः |

15. **श्लोकं पठित्वा प्रश्नान उत्तरत-** **[6]**

I. धनकामना सुखवासना न च वञ्चना हृदये ।
ऊर्जस्वला वर्चस्वला अतिनिश्चला विजये ।।

**I. एकपदेन उत्तरत-**

(i) वञ्चना कुत्र न भवेत् ?

(ii) कस्य कामना न भवेत् ?

**II. पूर्णवाक्येन उत्तरत-**

(i) विजये कीदृशाः भवेयुः ?

**III. निर्देशानुसारं उत्तरत-**

(i) 'हृदये' इत्यत्र का विभक्तिः ?

(क) प्रथमा

(ख) सप्तमी

(ग) तृतीया

(घ) द्वितीया

(ii) 'कपटः' इति पदस्य पर्यायः कः ?

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(क) विजये
(ख) कामना
(ग) वञ्चना
(घ) निश्चला

**Ans. :** I. 1. हृदये 2. धनस्य
II. विजये ऊर्जस्वला वर्चस्वला अतिनिश्चला भवेयुः ।
III. 1. (ख) सप्तमी2. (ग) वञ्चना

----- -----

Get More Learning Materials Here : CLICK HERE www.studentbro.in